# Mahamayakritam Purushottama Stotram

# महामायाकृतं पुरुषोत्तमस्तोत्रम् ९

## Document Information

Text title : Mahamayakritam Purushottama Stotram

File name : mahAmAyAkRRitaMpuruShottamastotram09.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 71/10-25||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# महामायाकृतं पुरुषोत्तमस्तोत्रम् ९

महामाया प्रकृतिर्या सा मां स्तौति पुनः पुनः ।
“नमस्तेऽक्षरवासाय परमेशाय ते नमः ॥ १०॥

अवतारस्वरूपायाऽवतारिणे च ते नमः ।
मायाऽहं भवतः शक्तिर्मायालोकाश्च ते प्रभो ॥ ११॥

ईश्वराणामालयाश्च तवैव भूमिकास्त्विमाः ।
तत्त्वानि च समस्तानि तवैव कार्यकाणि वै ॥ १२॥

पुराणपुरुषस्त्वं वै सर्वकारणकारणम् ।
श्रीभूलीलारमानाथ माणिकीमुक्तिकापते ॥ १३॥

प्रज्ञापद्मावतीकान्त नमस्ते सुखदापते ।
लक्ष्मीपद्मापते तुभ्यं नमो नारायणाय वै ॥ १४॥

सर्वेश्वरस्वरूपाय सर्वदेवात्मने नमः ।
अनन्तमूर्तये कृष्णनारायण हरे नमः ॥ १५॥

तेऽच्युताय च कान्ताय परमेशाय ते नमः ।
सर्वज्ञाय समस्ताय गोपालात्मज ते नमः ॥ १६॥

सर्वसृष्ट्यात्मने तुभ्यं नमस्ते परमात्मने ।
ब्रह्मणे ज्योतिषे तुभ्यं नमस्ते शुचिवर्चसे ॥ १७॥

प्रसवित्रे नमः पित्रे सर्गस्थित्यन्तहेतवे ।
नारायणाय च नमः सर्वात्मान्तरवर्तिने ॥ १८॥

अनन्तदिव्यगुणवन्! नमः पुमर्थदायिने ।
व्यूहरूपाय च नमः पञ्चावस्थास्वरूपिणे ॥ १९॥

प्रसीद भगवन् विष्णो सर्वलोकहिताय वै ।
आत्मानो ज्ञानहीना वै निराकारा निरिन्द्रियाः ॥ २०॥

सर्वानुष्ठानरहिता वर्तन्ते च निराश्रयाः ।
तेषां लोकाँश्च देहाँश्च दातुमर्हसि वै मयि ॥ २१॥

लीलाविभूतिं श्रीकृष्ण यथापूर्वं प्रकल्पय ।
चेतनाचेतनं कृत्स्नं जगत्स्थावरजङ्गमम् ॥ २२॥

पश्य लीनं मायिकं वै मयि सुप्तं प्रबोधय ।
प्रकृत्या वै मया सार्धं सृजस्व परमेश्वर ॥ २३॥

धर्माधर्मौ सुखं दुःखं भावयित्वा मयि प्रभो ।
मामधिष्ठाय वै लीलां श्रिया कर्तुं त्वमर्हसि” ॥ २४॥

इत्येवं चार्थितश्चाऽहं लक्ष्मि पूर्वं हि मायया ।
तस्यामेव हि मायायां जगत् स्त्रष्टुं प्रचक्रमे ॥ २५॥

इति श्रीलक्ष्मीनारायणीयसंहितायाः द्वापरयुगसन्तानात्मकस्य तृतीयखण्डे ७१-अध्यायान्तर्गतं महामायाकृतं पुरुषोत्तमस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड ३। अध्याय ७१/१०-२५॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 71/10-25..

Proofread by PSA Easwaran

*Mahamayakritam Purushottama Stotram*
pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*